শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরিঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে চৎৱারিংশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে চৎৱারিংশং দশকম্॥

## পূতনামোক্ষৱর্ণনম্

তদনু নন্দমমন্দশুভাস্পদং
    নৃপপুরীং করদানকৃতে গতম্।
সমৱলোক্য জগাদ ভৱৎপিতা
    ৱিদিতকংসসহাযজনোদ্যমঃ॥ 40.1 ॥

অযি সখে তৱ বালকজন্ম মাং
    সুখযতেঽদ্য নিজাত্মজজন্মৱৎ।
ইতি ভৱৎপিতৃতাং ব্রজনাযকে
    সমধিরোপ্য শশংস তমাদরাৎ॥ 40.2 ॥

ইহ চ সন্ত্যনিমিত্তশতানি তে
    কটকসীম্নি ততো লঘু গম্যতাম্।
ইতি চ তদ্বচসা ব্রজনাযকো
    ভৱদপাযভিযা দ্রুতমাযযৌ॥ 40.3 ॥

অৱসরে খলু তত্র চ কাচন
    ব্রজপদে মধুরাকৃতিরঙ্গনা।
তরলষটপদলালিতকুন্তলা
    কপটপোতক তে নিকটং গতা॥ 40.4 ॥

সপদি সা হৃতবালকচেতনা
    নিশিচরান্ৱযজা কিল পূতনা।

ৱ্রজৱধূষ্ৱিহ কেযমিতি ক্ষণং
ৱিমৃশতীষু ভৱন্তমুপাদদে॥ **40.5** ॥

ললিতভাৱৱিলাসহৃতাত্মভি -
র্যুৱতিভিঃ প্রতিরোদ্ধুমপারিতা।
স্তনমসৌ ভৱনান্তনিষেদুষী
প্রদদুষী ভৱতে কপটাত্মনে॥ **40.6** ॥

সমধিরুহ্য তদঙ্কমশঙ্কিত -
স্ত্ৱমথ বালকলোপনরোষিতঃ।
মহদিৱাম্রফলং কুচমণ্ডলং
প্রতিচুচূষিথ দুর্ৱিষদূষিতম্॥ **40.7** ॥

অসুভিরেৱ সমং ধযতি ৎৱযি
স্তনমসৌ স্তনিতোপমনিস্ৱনা।
নিরপতদ্ভযদাযি নিজং ৱপুঃ
প্রতিগতা প্রৱিসার্য ভুজাৱুভৌ॥ **40.8** ॥

ভযদঘোষণভীষণৱিগ্রহ -
শ্রৱণদর্শনমোহিতৱল্লৱে।
ৱ্রজপদে তদুরঃ স্থলখেলনং
ননু ভৱন্তমগৃহ্ণত গোপিকাঃ॥ **40.9** ॥

ভুৱনমঙ্গলনামভিরেৱ তে
যুৱতিভির্বহুধা কৃতরক্ষণঃ।
ৎৱমযি ৱাতনিকেতননাথ মা -
মগদযন্ কুরু তাৱকসেৱকম্॥ **40.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে চৎৱারিংশং দশকং সমাপ্তম্॥